पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्त्यस्येति । पिचिण्ड+ठन् ।) पिण्डिका । इति हेमचन्द्रः । ३ । २७६ ॥ पार डिम् इति भाषा ॥

पिचिण्डिलः, पुं, (अतिशयितः पिचिण्ड उदरमस्य । पिचिण्ड+तुन्दादित्वात् इलच् ।) वृहदुदरयुक्तः । इत्यमरः । २ । ६ । ४४ ॥ तत्पर्य्यायः । पिचण्डिलः २ वृहत्कुक्षिः ३ तुन्दी ४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८ । इति हेमचन्द्रः । ३ । ११४ ॥ (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादे ।

"पिचिण्डिलैः स्थूलवक्त्रैर्मेघगम्भीरनिस्वनैः ॥")

पिचुः, पुं, (पेचतीति । पिच मर्द्दने+मृगय्वादित्वात् कुः ।) कार्पासतूलः । इत्यमरः । २ । ९ । १०६ ॥ (यथा, सुश्रुते । ४ । ६ ।

"अर्शो वीक्ष्य शलाकयोत्पीड्य पिचुवस्त्रयोरन्यतरेण प्रमृज्य क्षारं पातयेत् ॥") कुष्ठभेदः । कर्षः । असुरविशेषः । इति मेदिनी । चे, ७ ॥ भैरवः । शस्यभेदः । इति विश्वः ॥ (चिकित्सोपयोगिपञ्चकर्म्मान्तर्गतक्रियाविशेषः । यथा,—

"कामिन्यां पूतियोन्याञ्च कर्त्तव्यः स्वेदनो विधिः ।
क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत् ॥
शल्लकीजिङ्गिनीजम्बुधवत्वक्पञ्चवल्कलैः ।
कषायैः साधितैः स्नेहः पिचुः स्याद्विप्लुतापहः ॥"

इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम् ॥)

पिचुकः, पुं, (पिचुरिव कायतीति । कै+कः ।) मदनवृक्षः । इति रत्नमाला ॥ मयना इति भाषा ॥

पिचुतूलं क्ली, (पिचोस्तूलम् ।) तूलः । इति त्रिकाण्डशेषः ॥

पिचुमन्दः, पुं, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति । मन्द+अण् ।) निम्बवृक्षः । इति हेमचन्द्रः । ४ । २०५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३४९ ।

"पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो मुखरः ।
अपि च पिचुमन्दमुकुले मौकुलिकुलमाकुलं मिलति ॥")

पिचुमर्द्दः, पुं, (पिचुं कुष्ठविशेषं मर्द्दयति मृद्नातीति वा । मृद्+अण् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (यथा, देवीभागवते । ३ । १० । १२ ।

"अवतामुपकाराय दुर्ज्जनानां विभूतयः ।
पिचुमर्द्दः फलाढ्योऽपि काकैरेवोपभुज्यते ॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"कैटर्य्यः पिचुमर्द्दश्च निम्बोऽरिष्टो वरत्वचा ।
हर्द्दुघ्नो हिङ्गुनिर्य्यासः सर्व्वतोभद्र इत्यपि ॥")

पिचुलः, पुं, (पिचुं लातीति । ला+कः ।) झावुकः । इज्जलः । जलवायसः । इति मेदिनी । ले, ११२ ॥ वकः । इत्यमरटीकायां सारसुन्दरी ॥

पिच्च क छेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पिच्चयति । इति दुर्गादासः ॥

पिच्चटं, क्ली, (पिच्चयतीति । पिच्च छेदने+अटन् ।) सीसकम् । रङ्गम् । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"रङ्गं वङ्गञ्च कस्तीरं त्रपुरङ्गं पुनः पिच्चटम् ॥")

नेत्ररोगे, पुं । इति मेदिनी । टे, ५० ॥

पिच्छ, श बाधे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, पिच्छती पिच्छन्ती । बाधो विहितिः । इति दुर्गादासः ॥

पिच्छं, क्ली, (पिच्छतीति । पिच्छ+अच् ।) मयूरपुच्छम् । तत्पर्य्यायः । शिखण्डः २ बर्हम् ३ । इत्यमरः । २ । ५ । ३१ ॥ शिखिपुच्छम् ४ शिखण्डकम् ५ । इति शब्दरत्नावली ॥ (यथा, अनर्घराघवे । ६ । ६५ ।

"तस्यारिवलभीमस्य ध्वजदण्डस्य लाञ्छनम् ।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत् ॥")

चूडा । इति मेदिनी । छे, ५ ॥

पिच्छः, पुं, (पिच्छतीति । पिच्छ+अच् ।) लाङ्गूलम् । इति मेदिनी । छे, ५ ॥

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः ।) बदरीवृक्षः । इति त्रिकाण्डशेषः ॥

पिच्छबाणः, पुं, (पिच्छं बाण इव यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

पिच्छा, स्त्री, (पिच्छ+अजादित्वात् टाप् ।) शाल्मलीवेष्टः । इत्यमरः । २ । ४ । ४७ ॥ (अस्याः पर्य्यायो यथा,—

"निर्य्यासः शाल्मलेः पिच्छा शाल्मली वेष्टकोऽपि च ।
मोचास्रावो मोचरसो मोचनिर्य्यास इत्यपि ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पूगः । छटा । कोषः । मोचा । भक्तसम्भूतमण्डम् । पङ्क्तिः । अश्वपदामयः । इति मेदिनी । छे, ४ ॥ चोलिका । फक्किलाला । इति हारावली । २३० ॥ शिंशपावृक्षः । इति शब्दचन्द्रिका ॥

पिच्छिका, स्त्री, (पिच्छं मयूरबर्हं अस्त्यत्रेति । पिच्छ+ठन् ।) चामरविशेषः । यथा । "पिच्छिकां भ्रामयित्वा बहुविधं हास्यं कृत्वा यक्षमहद् दत्त्वा चरणे इदं अलिं अर्पिता कुसुमस्य ।" इति रत्नावलीनाटके ४ अङ्कः ॥

पिच्छितिका, स्त्री, शिंशपा । इति शब्दचन्द्रिका ॥ (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या ॥)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भूतमण्डं अस्त्यस्येति । पिच्छादित्वात् इलच् ।) भक्तमण्डयुक्तम् । इति रायमुकुटः ॥ सरसव्यञ्जनादि । इति भरतः ॥ सूपादि । इति रमानाथः । स्निग्धसूपादि । इति भानुदीक्षितः ॥ मण्डयुक्तभक्तम् । जलयुक्तव्यञ्जनम् । इति नीलकण्ठः ॥ तत्पर्य्यायः । विजिलम् २ । इत्यमरः । २ । ९ । ४६ ॥ विजयिनम् ३ विजिनम् ४ विज्ज-लम् ५ इज्जलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ (यथा, छन्दोमञ्जर्य्याम् ।

"तरुणं सर्षपशाकं नवौदनानि पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥")

पिच्छयुक्तः ॥ (स्निग्धसरसपदार्थविशेषः । पेचलं इति भाषा ॥ यथा, साहित्यदर्पणे १० । ५५ ।

"काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले ! नहि नहि सखि ! पिच्छिलः पन्थाः ॥")

पिच्छिलः, पुं, (पिच्छं चूडास्त्यस्येति । पिच्छादित्वात् इलच् ।) श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलकः, पुं, (पिच्छिलः सन् कायतीति । कै+कः ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलच्छदा, स्त्री, (पिच्छिलश्छदो यस्याः ।) उपोदकी । इति राजनिर्घण्टः ॥

पिच्छिलत्वक्, [ च् ] पुं, (पिच्छिला त्वग् यस्य ।) नागरङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ धन्वनवृक्षः । इति रत्नमाला ॥

पिच्छिलसारः, पुं, (पिच्छिलः सारो यस्य ।) मोचरसः । इति राजनिर्घण्टः ॥

पिच्छिला, स्त्री, (पिच्छा+इलच् । ततष्टाप् ।) पोतिका । शिंशपा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"पिङ्गला पिच्छिला वीरा कृष्णसारा च शिंशपा ॥")

शाल्मलिः । (अस्याः पर्य्यायो यथा,—

"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सिन्धुभेदः । इति मेदिनी । ले, ११५ । कोकिलाक्षः । वृश्चिकाक्षुपः । मूलीतृणम् । अतसी । इति राजनिर्घण्टः ॥ कच्वी । इति शब्दचन्द्रिका ॥

पिज, इ क भासहार्थे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सकं च-सेट् ।) इ क, पिञ्जयति । भाः दीप्तिः । सहार्थो निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

पिज, इ ल ङ वर्णपूजयोः । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-अकं-सकं च-सेट् ।) इ, पिञ्जाते । ल ङ, पिङ्क्ते । इति दुर्गादासः ॥

पिञ्जं, क्ली, (पिञ्ज बले+भावे घञ् ।) बलम् । व्याकुले, त्रि । इति मेदिनी । जे, १३ ॥

पिञ्जः, पुं, (पिञ्ज वधे+भावे घञ् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ कर्पूरभेदः । इति राजनिर्घण्टः ॥

पिञ्जटः, पुं, (पिञ्जयति नेत्रं दूषयतीति । पिजि+अटन् ।) नेत्रमलम् । पिँचुटि इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।

"दूषीका दूषिका दूषिः पिञ्जटपिञ्जटावपि ॥"